अष्टमः पाठः

# नीतिपद्यानि

[संस्कृतभाषायां नीतिविषयकं विपुलं साहित्यं वर्तते। सदाचारस्य शिक्षया नीतिः मानवान् उन्नतान् करोति। नीतिः क्वचित् कथारूपेण प्रकाश्यते, क्वचित् पद्यरूपेण। पञ्चतन्त्रं कथात्मको नीतिग्रन्थः अस्ति। नीतिशतकं, चाणक्यनीतिदर्पणः, विदुरनीतिः एवमादयः ग्रन्थाः पद्यात्मकाः। सर्वेऽपि ते मानवस्य प्रगतिमुपदिशन्ति। तैः मानवः विचारपूर्वकं स्वकीयं मार्गं निश्चित्य सत्कार्यं कृत्वा उन्नतो भवति, समाजस्य हिताय उपयोगी च जायते। प्रस्तुते पाठे भर्तृहरिकृतस्य नीतिशतकस्य सरलानि पद्यानि संकलितानि सन्ति]

**अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।**
**ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥1॥**

**येषां न विद्या न तपो न दानं न चापि शीलं न गुणो न धर्मः ।**
**ते मर्त्यलोके भुवि चारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥2॥**

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति ।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्संगतिः कथय किं न करोति पुंसाम् ॥ 3॥**

**प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमाना प्रारब्धमुत्तमजना न परित्यजन्ति ॥ 4॥**

**निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।**
**अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ 5॥**

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥6॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमुपैति पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥7॥

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥8॥

## शब्दार्थाः

| | | |
|---|---|---|
| **अज्ञः** | ज्ञानहीनः | मूर्ख |
| **ज्ञानलवदुर्विदग्धम्** | अल्पेन ज्ञानेन अहंकारपूर्णः | दुष्ट पण्डित |
| **रञ्जयति** | आह्लादयति | प्रसन्न करता है |
| **मर्त्यलोके** | मनुष्यलोके | मनुष्य लोक में |
| **मृगाः** | पशवः | पशुगण |
| **जाड्यम्** | मूर्खताम् | अज्ञान को |
| **दिशति** | प्रयच्छति | बढ़ाती है |
| **अपाकरोति** | दूरीकरोति | दूर करती है |
| **दिक्षु** | दिशासु | दिशाओं में |
| **तनोति** | विस्तारयति | फैलाती है |
| **खलु** | निश्चयेन | निश्चय ही |
| **नीचैः** | अधमैः | नीच लोगों द्वारा |
| **विघ्नविहताः** | विघ्नैः प्रतिहताः | विघ्नों से आहत |
| **प्रतिहन्यमानाः** | समाक्रान्ताः | पीड़ित होते हुए |
| **नीतिनिपुणः** | नीतिज्ञः | नीतिकुशल |

| | | |
|---|---|---|
| **समाविशतु** | आगच्छतु | आये |
| **युगान्तरे** | अन्यस्मिन् काले | बहुत दिनों बाद |
| **निपतति** | आक्रामति | आक्रमण करता है |
| **कपोलम्** | गण्डस्थलम् | गाल |
| **सत्त्ववताम्** | बलशालिनाम् | बलवानों का |
| **गुर्वी** | बृहती, महती | बड़ी |
| **क्षयिणी** | क्षीयमाणा | क्षीण होने वाली |
| **लघ्वी** | सूक्ष्मा, अल्पकाया | छोटी |
| **पुरा** | पूर्वम् | पहले |
| **अभ्युदये** | सम्पदि | उन्नति काल में |
| **युधि** | समरे | युद्ध में |
| **व्यसनम्** | आसक्तिः | आसक्ति, लगाव |
| **श्रुतौ** | शास्त्रे | शास्त्र में |
| **न्याय्यः** | न्यायसंगतः, उचित | सही, उचित |

## व्याकरणम्

### (क) सन्धिविच्छेदः

| | | |
|---|---|---|
| **सर्वेऽपि** | – | सर्वे + अपि |
| **सुखमाराध्यः** | – | सुखम् + आराध्यः |
| **मृगाश्चरन्ति** | – | मृगाः + चरन्ति |
| **मानोन्नतिम्** | – | मान + उन्नतिम् |
| **यथेष्टम्** | – | यथा + इष्टम् |
| **प्रारब्धमुत्तमजनाः** | – | प्रारब्धम् + उत्तमजनाः |
| **शिशुरपि** | – | शिशुः + अपि |

| | | |
|---|---|---|
| **अद्यैव** | – | अद्य + एव |
| **प्रकृतिरियम्** | – | प्रकृतिः + इयम् |
| **वृद्धिमुपैति** | – | वृद्धिम् + उप + एति |
| **छायेव** | – | छाया + इव |

## ( ख ) व्युत्पत्तिः ( प्रकृतिप्रत्ययविग्रहः )

| | | |
|---|---|---|
| **अज्ञः** | – | नञ् + Öज्ञा + क |
| **विशेषज्ञः** | – | विशेषं जानाति, विशेष + Öज्ञा + क |
| **दुर्विदग्धः** | – | दुर् + वि + Öदह् + क्त |
| **उन्नतिः** | – | उत् + Öनम् + क्तिन् |
| **विहताः** | – | वि + Öहन् + क्त |
| **सत्त्ववताम्** | – | सत्त्व + मतुप् ( षष्ठी बहुवचन) |
| **क्षयिणी** | – | क्षय + इनि + ङीप् |
| **लघ्वी** | – | लघु + ङीप् (स्त्री०) |
| **गुर्वी** | – | गुरु + ङीप् (स्त्री०) |
| **भिन्ना** | – | Öभिद् + क्त + टाप् |

## अभ्यासः ( मौखिक )

**1. संस्कृतभाषया उत्तराणि वदत–**

(क) मनुष्यरूपेण के मृगाश्चरन्ति?

(ख) के भुवि भारभूताः सन्ति?

(ग) विघ्नविहताः प्रारभ्य के विरमन्ति?

(घ) न्यायात् पथः के न प्रविचलन्ति?

(ङ) महात्मनाम् विपदि किम् लक्षणम् भवति?

## अभ्यासः ( लिखितः )

1. **एकपदेन संस्कृतभाषया उत्तराणि लिखत–**

(क) कदा सिंहशिशुरपि निपतति?

(ख) मर्त्यलोके भुवि भारभूताः के सन्ति?

(ग) का धियः जाड्यम् हरति?

(घ) चेतः कः प्रसादयति?

(ङ) दिक्षु कीर्तिं कः तनोति?

(च) महात्मनाम् किम् लक्षणम् अस्ति?

2. **अधोलिखितानि रेखांकितपदानि बहुवचने परिवर्तयत–**

उदाहरणम् – **एकवचने- त्वं कार्ये प्रवृत्तः असि ।**

**बहुवचने – यूयं कार्ये प्रवृत्ताः स्थ।**

(क) <u>यस्य</u> पार्श्वे नास्ति विद्या <u>सः</u> <u>मृग</u> इव <u>चरति</u>।

(ख) सत्संगतिः <u>पुरुषस्य</u> वाचि सत्यम् सिञ्चति।

(ग) नीचैः विघ्नभयेन <u>कार्यं</u> न <u>प्रारभ्यते</u>।

(घ) सत्सङ्गतिः <u>पुरुषस्य</u> मानोन्नतिम् दिशति।

3. **उचितविभक्तिप्रयोगं कृत्वा वाक्यानां पूर्तिः कुरुत–**

उदाहरणम् – **बालकेन ········ अक्षरं लिखितम्। ( सुन्दर )**

**बालकेन <u>सुन्दरम्</u> अक्षरं लिखितम् ।**

(क) ज्ञानलवदुर्विदग्धं ········ ब्रह्मापि न रञ्जयति। (नर)

(ख) विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः ········ न परित्यजन्ति। (उत्तमजन)

(ग) धीराः ········ पथः न प्रविचलन्ति। (न्याय)

(घ) सज्जनानाम् मैत्री दिनस्य ········ छाया इव भवति। (परार्धभिन्न)

(ङ) उत्तमजनाः ········ न परित्यजन्ति। (प्रारब्धकार्य)

4. अधोलिखितेषु शुद्धं पर्यायपदद्वयं रेखांकितं कुरुत–

(क) **निपुणाः** – विज्ञाः, अज्ञाः, विशेषज्ञाः

(ख) **लक्ष्मीः** – इन्दिरा, रमा, शारदा

(ग) **पथः** – मार्गात्, सरण्याः, कुल्यायाः

(घ) **शिशुः** – बालः, श्येनः, नवजातः

(ङ) **सदसि** – सभायाम्, सरसि, परिषदि

5. एकं समुचितं पदं लिखत–

यथा– **यस्य पार्श्वे 'ज्ञा' नास्ति सः ..........।**

**यस्य पार्श्वे 'ज्ञा' नास्ति सः <u>अज्ञः</u>।**

(क) विघ्नेन विशेषेण हताः ये ते ..........।

(ख) नीतौ निपुणा ये ते ..........।

(ग) सतां संगतिः ..........।

(घ) महान् आत्मा अस्ति यः ..........।

6. स्तम्भद्वये लिखितानां विपरीतार्थकशब्दानां मेलनं कुरुत–

| (अ) | (ब) |
|---|---|
| (i) अज्ञः | (क) दुःखम् |
| (ii) सुखम् | (ख) विज्ञः |
| (iii) विशेषज्ञः | (ग) दुरात्मनाम् |
| (iv) विदग्धम् | (घ) अधमाः |
| (v) भुवि | (ङ) उच्चैः |
| (vi) नीचैः | (च) रसातले |
| (vii) उत्तमाः | (छ) अल्पज्ञः |
| (viii) महात्मनाम् | (ज) मूर्खम् |

## योग्यता-विस्तारः

(क) इस पाठ के सभी पद्य लोकव्यवहार का वर्णन करते हैं। प्रथम पद्य में अधूरे ज्ञान वालों की निन्दा है। कुछ लोकोक्तियाँ भी हैं- (1) अधजल गगरी छलकत जाय (2) नीम-हकीम खतरे जान। दूसरे पद्य में मानव के आवश्यक गुणों की सूची है जिनके अभाव में वह पशुमात्र है। भर्तृहरि ने एक अन्य पद्य में भी कहा है–

साहित्यसंगीत-कला-विहीनः साक्षात्पशुः पुच्छविषाणहीनः।

तीसरे पद्य में सत्संगति का महत्व और चौथे पद्य में आरम्भ किये गये काम को बीच में न छोड़ने का उपदेश है। तुलना करें– अङ्गीकृतं सुकृतिनः परिपालयन्ति। प्रायः यही बात पाँचवें पद्य में है कि बुद्धिमान लोग सही मार्ग से नहीं हटते, संसार कुछ भी कहे। छठे पद्य में सिंह के बच्चे का उदाहरण देकर तेजस्वियों की आयु का विचार न करने का उपदेश है। सातवें पद्य में दिन के पूर्वार्ध और उत्तरार्ध की छाया की उपमा देकर मैत्री के दो रूपों का वर्णन है। अंतिम पद्य महापुरुषों के स्वभाव का चित्रण करता है।

(ख) अकः सवर्णे दीर्घः–

अकः सवर्णदचि परे दीर्घ एकादेशः स्यात्। स्वरवर्णात् परः समानवर्णः भवेत् तदा दीर्घस्वरो भवति।

यथा – **चापि** = च + अपि (अ + अ = आ)

**ब्रह्मापि** = ब्रह्मा + अपि (आ + अ = आ)

**युगान्तरे** = युग + अन्तरे (अ + अ = आ)

**मुनीन्द्रः** = मुनि + इन्द्रः (इ + इ = ई)

**सुधीन्द्रः** = सुधी + इन्द्रः ( ई + इ = ई)

**अथाभ्युदये** = अथ + अभ्युदये ( अ + अ = आ)

**चाभिरुचिः** = च + अभिरुचिः ( अ + अ = आ)



(ग)

**इस पाठ में गेय छन्दों का प्रयोग है। उन्हें योग्य व्यक्तियों से गाकर पढ़ने का अभ्यास करें। छन्दों के नाम–**

(1) आर्या – प्रथम तथा षष्ठ पद्य।

(2) उपजाति – द्वितीय तथा सप्तम पद्य।

(3) वसन्ततिलका – पद्य संख्या 3, 4 तथा 5

(4) द्रुतविलम्बित – अष्टम पद्य।